## शेः छन्दसि बहुलम् । (७०/३६१६)

शि इत्येतस्य बहुलं छन्दसि [1]विषये लोपो भवति । या क्षेत्रा । 'या वना' (अ. वे. १४.२.७) । 'यानि क्षेत्राणि' (अ. वे. १४.२.७) । यानि वनानि ॥

## ह्रस्वस्य पिति कृति तुक् । (७१/२८७८)

पिति कृति परतो [2]ह्रस्वान्तस्य धातोः तुगागमो भवति । अग्निचित् । सोमसुत् । प्रकृत्य । प्रहृत्य । उपस्तुत्य । ह्रस्वस्य इति किम् ? [3]आलूय । ग्रामणीः । पिति इति किम् ? [4]कृतम् । हृतम् । कृति इति किम् ? पटुतरः । पटुतमः । [5]ग्रामणि ब्राह्मणकुलम् इत्यत्र ह्रस्वस्य बहिरङ्गस्य असिद्धत्वात् तुग् न भवति ॥

## संहितायाम् । (७२/१४७)

अधिकारोऽयम् 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८/३६५०) इति यावत् । प्रागेतस्मात् सूत्राद् इत उत्तरं यद्वक्ष्यामः संहितायाम् इत्येवं तद् वेदितव्यम् । वक्ष्यति – 'इको यणचि' (६.१.७७/४७)[6], दध्यत्र । मध्वत्र । संहितायाम् इति किम् ? दधि अत्र । मधु अत्र ॥

## छे च । (७३/१४६)

ह्रस्वस्य तुक् इति वर्तते । छकारे परतः संहितायां विषये ह्रस्वस्य तुगागमो भवति । इच्छति । यच्छति[7] । ह्रस्व एवा[8]ऽऽगमी, न [9]तु तदन्तः । तेन [10]चिच्छदतुः, चिच्छिदुः इत्यत्र तुक् अभ्यासस्य ग्रहणेन न गृह्यते इति [11]हलादिःशेषेण न निवर्त्यते, नावयवावयवः समुदायावयवो भवति इति ॥

## आङ्माङोश्च । (७४/१४७)

तुक् इति अनुवर्तते, छे इति च । आङो ङित [12]ईषदादिषु [13]चतुर्ष्वर्थेषु वर्तमानस्य, माङश्च प्रतिषेधवचनस्य छकारे परतस्तुगागमो भवति । 'पदान्ताद् वा' (६.१.७६/१४९) इति विकल्पे प्राप्ते नित्यं तुगागमो भवति । ईषदर्थे – ईषच्छाया आच्छाया । क्रियायोगे – आच्छादयति । मर्यादाभिविध्योः – आ च्छायायाः आच्छायम् । माङः खल्वपि – मा च्छैत्सीत् । मा च्छिदत् । ङिद्विशिष्टग्रहणं किम् ? आछाया, आच्छाया । प्रमाछन्दः, प्रमाच्छन्दः ॥

---

1. विषये नास्ति फ. 2. ह्रस्वस्य ड. 3. विलूय ह. 4. कृतवान्, हृतवान् ह. 5. ग्रामणि ब्राह्मणम् क. 6. इति इत्यधिकम् फ. 7. यच्छन्ति इत्यधिकम् क. ह. 8. अत्र नास्ति क. 9. त्वदन्तः फ. ड. 10. चिच्छेद इत्यधिकम् फ. 11. हलादिशेषेण क. फ. 12. ईषदाद्यर्थेषु क. फ. 13. संहितायां विषये इत्यधिकम् फ.